क्रियते शिवे । तव कृत्यमिदं सर्वम् KulārT. 7.56; अज्ञानतः ··· कुरुते चिकित्साम् । सर्वानसौ मारयतीह जन्तून् KalyāKā. 7.49; अतीतं वर्तमानं च ज्ञानतोऽज्ञानतः कृतम् । यदेनस्तत्क्षयं यायात् SkandP. iv. 86.116; बालो वै यानि कर्माणि करोत्यज्ञानतः स्वयम् । न स लिप्यति पापेन VarāP. 137.110; बाल्ये चाज्ञानतस्तात कृत्याकृत्यं कृतं मया PadmP. ii. 8.79; iv. 94.88; एषा तु शीलमेवैकं ररक्षाज्ञानतस्तदा । तेन श्रयोनौ पतिता KathāSaSāg. ii. 5.135; व्याजहुः सूर्योऽनार्यदेशेष्वज्ञानतः सदा PariPa. 11.97; स स्वभावतः । अज्ञानतो वा (अज्ञः) UpādhiKha. 1B.3; अज्ञानतो मया पूर्वं दृष्टः प्राणप्रियोऽप्रियः MalliC. 2.507; यत्किंचिदत्र गदितं न चरित्रशेषमज्ञानतः PrabhāC. 40.16; अज्ञानतस्त्वं गुरुरल्पबुद्धिः । शिष्योऽहमेतत् खलु मेदजातम् S'aṅkaVi.(Ā.) 276.1; केचिदज्ञानतो नष्टाः केचिन्नष्टाः प्रमादतः S'ārṅgaPa. 1437; Subhāṣi. 2764; अज्ञानतः शिखानित्यत्वाज्ञानात् ViraMi. (Saṁskāra.) 316.23; यावदज्ञानतो मौनम् ··· । तावान्माहात्म्यरूपेण पर्यवस्यति मान्त्रिके KaliVid. 13; दुःखाय नित्यं प्रकृतेश्च योगादज्ञानतः स्यात्पुरुषस्य बन्धः Vidvanmo. 6.21; स्थापितं यदि लोभेन मोहेनाज्ञानतोऽपि वा TantrRā. 6.57; **C ii** due to nescience, from primordial ignorance अज्ञानतः स्फुरणमस्फुरणं च दृष्टम् SaṅkṣeS'ā. 44 (i. 50.9); कूटस्थे विक्रिया नास्ति तस्मादज्ञानतो जनिः BṛĀraUBhVā. i. 4.626; i. 4.1011; अज्ञानतोऽध्यासवशात्प्रकाशते AdhyāRā. vii. 5.36; S'aṅkaDigVi.(Mā.) 10.91; तत्रापि यदि अज्ञानतोऽतिरिक्ता माया न तत्र प्रमाणम् SiddhāTa. 47.11; 58.18; **D** due to misunderstanding, out of mistake अज्ञानतः स्वचरितं नृपतिः शशंस RaghuVa. 9.77 (Malli. करिभ्रान्त्या); जघान मृगरूपान् सोऽज्ञानतो ब्राह्मणान् नृपः VarāP. 41.19; मध्याह्नार्कमरीचिकास्विव पयःपूरो यदज्ञानतः PraboCan. 1.1.

**अज्ञानतस्कर** (ajñāna-taskara) *m.* thief in the form of nescience दिष्ट्येदानीं परिज्ञातो मयैवाज्ञानतस्करः YogVā. v. 52.47.

**अज्ञानता** (ajñāna-tā) *f.* **i** the state of ignorance, positive ignorance कदाचिदज्ञानतयैवमंगना । गृहीतगर्भा प्रथमे दिने भवेत् KalyāKā. 2.46; द्वयोरप्यभावयोर्जनिमत्वादज्ञानस्य च तदप्रतीतेर्न तयोरज्ञानता IṣṭaSi 67.2; छादयिष्यत्यात्मजयोर्दोषमज्ञानतैव हि TriṣaS'aPuC. iv. 3.127; तेनाप्यज्ञानता तस्मादध्येतव्यं ध्रुवं मया PrabhāC. 124.4(14); अज्ञानतया यन्मया कृतं तत् सर्वं सहनीयम् SamyaKau. 52.9; 75.1; **ii** the state of being false knowledge अज्ञानतामज्ञानमिति प्रतीतिविषयतां संदेहगोचरतां च TattvPrakā. 3A.5 (i. 1.1)

**अज्ञानतादात्म्य** (ajñāna-tādātmya) *n.* identity with nescience अज्ञानोपहित, आत्मा अज्ञानतादात्म्यापन्नस्वचिदाभासाविवेकादन्तर्यामी ··· ईश्वर इति च कथ्यते SiddhāBi. 42.6; अहंकारावच्छेदेन चित्संबन्धमज्ञानतादात्म्यमपि स्वीक्रियताम् GuruCandr. i. 53.11; i. 53.23; i. 156.20; iii. 170.16.

**अज्ञानतापसंतप्त** (ajñānatāpa-santapta) *adj.* afflicted by the troubles arising out of ignorance (जलैः) अज्ञानतापसंतप्तप्राणिप्राणैकरक्षिभिः । ··· स ईशानः ··· स्नपयामास (लिङ्गम्) SkandP. iv. 33.23.

**अज्ञानताप्रसिद्धि** (ajñānatā-prasiddhi) *f.* common knowledge as ignorance न हि भ्रान्तिसंशयौ मुक्त्वा अन्यस्य सर्वमानातिगस्य अज्ञानताप्रसिद्धिः IṣṭaSi. 48.13.

**अज्ञानतिमिर** (ajñāna-timira) *n.* **i** darkness of ignorance अज्ञानतिमिरप्लोषिललाटनयनत्विषे । नमस्ते त्रिपुराराते AbirBuS. 14.1; तत्र प्रथमोक्तेषु हासहेतुषु कार्यकारणभावेऽपि सत्यज्ञानतिमिरतिरोधीयमानज्ञानालोको लोको विरुद्धत्वमभिमन्यते TattvSaṁPañ. 157.3 (*on* 442); सत्यमेकत्वमज्ञानतिमिरतिरोहितं परमभिध्यायतः अभिव्यज्यते BrabmSūBh.(Bhā.) 162.6 (*on* iii. 2.5); अज्ञानतिमिराच्छन्नो ज्ञानं प्राप्नोति तद्विदः BrahmVaiP. iii. 42.34; iii. 44.64; iii. 40.91; अज्ञानतिमिरस्यैश्वर्यमहाग्रहस्य च समवायः YaśasCam. ii. 66.6; अज्ञानतिमिरच्छन्ने जगत्कारागृहान्तरे (भ्राम्यन्न मुक्तिमाप्नोति) SkandP. ii(2). 27.34; iii(1). 26.116; iv. 36.1; अज्ञानतिमिरान्तरितदृष्टेः ··· मे पुनरात्मलाभेन प्रसीदतु भगवान् UdaySuKa. 142.17; अज्ञानतिमिरं हत्वा नवभानुरिव प्रभो PārśvC. 1.650; DīpKa. 1.7 (*on* 1.1); VīraBhā. 4.25; **ii** amaurosis (*timira*) in the form of ignorance अज्ञानतिमिरोपेतान् संदेहपटलान्वितान् । निरामयान् यः कुरुते शास्त्राञ्जनशलाकया BṛhaSm. 16.96; शास्त्राञ्जनेन योऽज्ञानतिमिरं विनिपातयेत् JayāS. 1.65; अज्ञानतिमिरयोगादेकमपि स्वं स्वभावमात्मानम् । ग्राह्यग्राहकनानावैचित्र्येणावबुध्येत ParamāSā. 25.

**अज्ञानतिमिरान्ध** (ajñānatimirāndha) *adj.* **i** blinded by the darkness of ignorance अज्ञानतिमिरान्धस्य कावस्था जगतो भवेत् MahāBhā. i. 66*(2); अज्ञानतिमिरान्धानां जनानामविवेकिनाम् । शास्त्रपीठप्रतिष्ठानात् ज्ञानमेति च निर्मलम् PauṣkS. 41.95; अज्ञानतिमिरान्धस्य मद्यपानरतस्य च ĀpaSm. 8.16; दृष्टमपि येन न दृष्टं तस्याज्ञानतिमिरान्धस्य किं क्रियताम् Kād. 288.21; BṛNāraP. 21.20; SkandP. ii(2). 33.1; iv. 40.152; v(3). 168.4; अज्ञानतिमिरान्धस्य व्रतेनानेन केशव । प्रसीद संमुखो भूत्वा PadmP. vi. 64.39; अज्ञानतिमिरान्धानाम् ··· । ध्रुवो नान्योऽस्ति जगति लिङ्गाराधनमन्तरा S'ivaP. i. 21.35 (28A.5); अज्ञानतिमिरान्धोऽपि ।··· शृण्वन्नेतन्महातन्त्रं कर्मबन्धाद्विमुच्यते MahNirvāT. 14.205; **ii** blinded by amaurosis (*timira*) in the form of ignorance अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया । चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः BrahmVaiP. iv. 59.147; SkandP. v(3). 43.25; BrahmP. 245.12; अज्ञानतिमिरान्धानाम् ···। नेत्रमुन्मीलितं येन तस्मै श्रीगुरवे नमः KumāPraPra. 35.8; TantrSā.(K.) 63.17; अज्ञानतिमिरान्धानां त्वमेव परमाञ्जनम् BṛBrahmS. i. 2.26.



**अज्ञानतिमिरापह** (ajñānatimirāpaha) *adj.* dispelling the darkness of ignorance पावनं परमं ज्ञानमज्ञानतिमिरापहम् PauṣkS. 1.44; तन्निष्ठानामिदं नित्यमज्ञानतिमिरापहम् PāraS. 24.26; इति संचिन्त्य भगवानज्ञानतिमिरापहः । तमुवाच ··· वसिष्ठः YogVā. iv. 39.27; नमस्यामि···। ईश्वराख्यं परं ज्योतिरज्ञानतिमिरापहम् ChandaśCū. 1.16 (13); KāvyKaVṛ. 12.24 (1.2)

**अज्ञानतिमिरार्क** (ajñānatimirārka) *m.* sun (dispelling) darkness of ignorance अज्ञानतिमिरार्कार्भैः (कलशैः ईशानः स्नपयामास लिङ्गम्) SkandP. iv. 33.24.

**अज्ञानतिमिरावृत** (ajñānatimirāvṛta) *adj.* covered with darkness in the form of ignorance (अगस्त्यः) जन्तूनज्ञानतिमिरावृतान् ··· दृष्ट्वा चिन्तयामास तान् प्रति BrahmāṇḍP. iii. 5.5; (देवाः) शून्यं गिरिमपश्यन्त ह्यज्ञानतिमिरावृताः VāmaP. 62.4; यदा शम्भो महादेवो ह्यज्ञानतिमिरावृतैः (ऋषिभिः) SkandP. vii(1). 304.8.

**अज्ञानतिमिरोद्भूति** (ajñānatimirodbhūti) *f.* rise of the darkness of ignorance अज्ञानतिमिरोद्भूतिदूषिताशयलोचनः । जनः ··· प्रायो वस्तु न पश्यति SkandP. i(3B). 9.32.

**अज्ञानतिरोभाव** (ajñāna-tirobhāva) *m.* disappearance of ignorance अथाज्ञानतिरोभावार्थमुपादानमिति NyāyVār. 490.5 (*on* iv. 1.99)

**अज्ञानतिरोहित** (ajñāna-tirohita) *adj.* **A** concealed by ignorance ऐश्वर्यमज्ञानतिरोहितं सद् ध्यानादभिव्यज्यत इत्यवोचत् SaṁkṣeS'ā. 3.175 (ii. 255.8); अनुभूयते हि स्वयंज्योतिषोऽपि भोक्तुर्देहादिसंघाताद्व्यावृत्तत्वमज्ञानतिरोहितमेव VivaPraSaṁ. 61.11; 'अस्य महिमानमिति' इत्यस्याज्ञानतिरोहितब्रह्मभावाविर्भावपरत्व एव साङ्गत्यात् S'ivārkaMaDī. i. 406.32 (*on* i. 3.6); **B** overpowered by ignorance सच्चित्सदानन्दकृतस्वरूपं अमे( ? वे )त्यमज्ञानतिरोहितानाम् । ···प्रणताः स देवम् BṛNāraP. 15.64.

**अज्ञानतुम्ब** (ajñāna-tumba) *adj.* having the nave of ignorance अज्ञानतुम्बम्···मोहाभिरागप्रतिबद्धनेमिम् ।··· संसारचक्रं समनुजिगाय (? समुनि°) VarāṅgaC. 31.32.

**अज्ञानतुल्य** (ajñāna-tulya) *adj.* equal to ignorance एकः शत्रुर्न द्वितीयोऽस्ति शत्रुरज्ञानतुल्यः पुरुषस्य राजन् SaṁkṣeS'ā. 1.321 (i. 24.23)

**अज्ञानत्व** (ajñāna-tva) *n.* **i** the state of having ignorance अज्ञानत्वं च मूकत्वमित्याद्यास्तामसाः स्मृताः (व्याधयः) SaurP. 13.11; विष्णुब्रह्मसूर्या मयि देवबोधे क्रुद्धे सति अज्ञानत्वान्न काः न वादिनः PrabhāC. 173.18; यथा लोष्टो लुठद्वृक्षं वञ्चयित्वाशु गच्छति । अज्ञानत्वेऽजपशवस्तथा ह्यस्ति पुरादिकम् YogVā. iii. 57.41; अज्ञानत्वा( ? °ज्ञाना )द्वे शते दण्डयः ManvaMu. 311.9 (*on* 8.121); अहो मम अज्ञानत्वम् KathāK. 94.7; **ii** the state of non-knowledge, the nature of being different from knowledge अज्ञानत्वे परिज्ञाते तदा स्वात्स्वविरोधिता S'ivDṛ. 4.25; अज्ञानत्वे वा न ज्ञानोपादानत्वम् NyāyVārPari. 517.2; इदंता हि अज्ञानत्वम् PratyabhiVi. i. 75.3 (*on* i. 1.4); जडत्वमप्यज्ञातृत्वं वा अज्ञानत्वं वा Nyāyāmṛ. 68B.7; अविद्यावृत्तेरज्ञानत्वे ज्ञानस्यौत्सर्गिकं प्रामाण्यमिति विरुध्येत AdvaiSi. 654.15; 295.1; **iii** nature of ignorance (as a positive entity) अज्ञानत्वविरुद्धधर्मवत्तया वा अधिष्ठानज्ञानम् AdvaiSi. 650.10; **iv** the state or nature of nescience अवस्थासु अज्ञानत्वरूपाखण्डधर्मानङ्गीकारात् GuruCandr. ii. 151.15; i. 103.5; अज्ञानमिति प्रत्यये ··· विषयविशेषाश्रितमज्ञानत्वरूपाखण्डधर्मविशिष्टं विषयः LaCandr. 550.26; 299.10.

**अज्ञानत्वजाति** (ajñānatva-jāti) *f.* generic quality of nescience नञ्पूर्वकजानातेरज्ञानत्वजातिमति लक्षणया तादृशज्ञानस्य तद्विषयकत्वात् LaCandr. 550.30; 564.20.

**अज्ञानत्वप्रसङ्ग** (ajñānatva-prasaṅga) *m.* possibility of being of the nature of what is different from knowledge सर्वात्मना हि सारूप्ये ज्ञानमज्ञानतां व्रजेत् (v. l. न च सर्वात्मना साम्यमज्ञानत्वप्रसङ्गतः) न च केनचिदंशेन सर्वं सर्वस्य वेदनम् PramāVār. 3.435; निर्विषयत्वेनाज्ञानत्वप्रसङ्गात् NyāySiA. 242.22; तद्वदेवाज्ञानत्वप्रसङ्गात् NyāyPari. 483.21.

**अज्ञानत्वप्रसिद्धि** (ajñānatva-prasiddhi) *f.* common knowledge of being of the nature of ignorance ननु भ्रान्तिरेवाज्ञानम्, तस्या अज्ञानत्वप्रसिद्धेः IṣṭaSi. 48.12.

**अज्ञानत्वप्राप्ति** (ajñānatva-prāpti) *f.* contingency of being nescience